## कोपधादण् । (१३२/१३५६)

देशे इत्येव । ककारोपधात् प्रातिपदिकाद् अण् प्रत्ययो भवति शैषिकः । जनपदवुञोऽपवादः । अन्यत्र [1]जनपदं मुक्त्वा पूर्वेणैव [2]कोपधादणि सिद्धम् । ऋषिकेषु जातः आर्षिकः । [3]माहिषिकः । अण्ग्रहणमुवर्णान्तादपि यथा स्यात्, इक्ष्वाकुषु जातः [4]ऐक्ष्वाकः ॥

## कच्छादिभ्यश्च । (१३३/१३५७)

देशे इत्येव । कच्छ इत्येवमादिभ्यो देशवाचिभ्यः [5]अण् प्रत्ययो भवति शैषिकः । [6]वुञादेरपवादः । काच्छः । सैन्धवः । वार्णवः । कच्छशब्दो न बहुवचनविषयः, तस्य मनुष्यतत्स्थयोर्वुञर्थः (४.२.१३४/१३५८) पाठः । विजापकशब्दः पठ्यते, तस्य कोपधत्वादेवाणि सिद्धे[7] ग्रहणमुत्तरार्थम् ।

कच्छ । सिन्धु । वर्णु । [8]गन्धार । मधुमत् । कम्बोज । [9]कश्मीर । साल्व । कुरु । रङ्कु । [10]अणु । खण्ड । द्वीप । अनूप । अजवाह । विजापकः । [11]कुलून[12] । कच्छादिः ॥

## मनुष्यतत्स्थयोर्वुञ् । (१३४/१३५८)

कच्छादिभ्यः इत्येव । मनुष्ये [13]मनुष्यस्थे च [14]जातादौ प्रत्ययार्थे कच्छादिभ्यो वुञ् प्रत्ययो भवति[15] । अणोऽपवादः । काच्छको मनुष्यः । काच्छकमस्य हसितं, [16]जल्पितम् । [17]काच्छिका चूडा । सैन्धवको मनुष्यः । सैन्धवमस्य हसितं, [18]जल्पितम् । सैन्धविका चूडा । मनुष्यतत्स्थयोः [19]इति किम् ? काच्छो गौः । [20]सैन्धवो वार्णवः ॥

## अपदातौ साल्वात् । (१३५/१३५९)

साल्वशब्दः कच्छादिषु पठ्यते, ततः पूर्वेणैव मनुष्यतत्स्थयोः वुञि सिद्धे नियमार्थं वचनम् । अपदातावेव मनुष्ये [21]मनष्यस्थे च साल्वशब्दाद् वुञ् प्रत्ययो भवति । साल्वको मनुष्यः । साल्वकमस्य हसितम्, [22]जल्पितम् । अपदातौ इति किम् ? साल्वः पदातिर्व्रजति ॥

## गोयवाग्वोश्च । (१३६/१३६०)

गवि यवाग्वां च जातादौ [23]प्रत्ययार्थे साल्वशब्दाद् वुञ् प्रत्ययो भवति शैषिकः । कच्छाद्यणोऽपवादः । साल्वको गौः । [24]साल्विका यवागूः । साल्वमन्यत् ॥

---

1. जनपदं नास्ति फ. 2. कोपधादणा ब, अण्सिद्धः क.इ.ड, अण्सिद्धिः ह. 3. माहिषकः क. फ. 4. ऐक्ष्वाकवः क. 5. प्रातिपदिकेभ्यः इत्यधिकम् ब. क. इ. 6. वुञोऽपवादः फ. 7. इह इत्यधिकम् क. 8. गन्धारि ह. 9. काश्मीर क. 10. अण्ड ब. 11. कुतुक ह, कुसूल क. 12. क्षत्रियकूप इत्यधिकम् क. 13. तत्स्थे क.फ. 14. जातावर्थे ह, जातादौ अभिधेये फ. 15. शैषिकः इत्यधिकम् ब.क. 16. जल्पितम् नास्ति ह. 17. कच्छादिका ह. 18. जल्पितम् नास्ति ह. 19. जातयोः इत्यधिकम् ह. 20. सैन्धवो वार्तवर्णः ह, सैन्धवः कम्बलः ड. 21. तत्स्थे फ.ह. 22. जल्पितं नास्ति फ. 23. अर्थे ह. 24. साल्वका ब.